Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SISRRJ | Volume 1 | Issue 3 | ISSN : 2581- 6306

# मिथिलामहीमण्डनमहानमीमांसको मण्डनमिश्र:



**डॉ.दिनेश कुमार झा**
**ग्रा.पो. अंधराठाढी, जि. मधुबनी,**
**बिहार, भारत।**

**सारांश:** – वाग्देव्या अंशभूताऽऽचार्यधर्मपत्नी सकलविद्यानिष्णाता स्वनामधन्या श्रीभारती– आचार्यशङ्करयोर्वादजल्पवितण्डासु तत्त्वबुभूत्सारूपवादमाश्रित्य जाते शास्त्रर्थे मध्यस्थतामाललम्बे। यत्र च राजकीयसंस्कृतोच्चविद्यालयीया: शतशश्छात्रा शतशश्छात्र अहरह: शास्त्राणि चिन्तयन्त: स्मारयन्ति दिदृक्षया समागतातिथीन् श्रीमदाचार्यपादकालम्।

**मुख्यशब्द:** – मण्डनमिश्र:, मीमांसक:, चिन्तयन्त:, विधिविवेक:, भावनाविवेक:, ब्रह्मसिद्धि:, स्फोटसिद्धि:।

---

अस्ति मिथिलायां “सहरसा”मण्डलायां ‘माहिष्मती’नामापरनामक ‘महिसी’ नाम्नी नगरी। तस्यां नगर्य्यां ‘श्री 108 उग्रतारा भगवती शीघ्रफलप्रदां वरीवति। यस्य सन्निधौ महर्षि वशिष्ठोऽपि तपस्तप्त्वा परमपदमाप्तवान् एतस्यां महत्यां महिसीनगर्यां शङ्कराचार्यात्प्राचीनो मैथिलभूसुरो महामहोपाध्यायमीमांसकप्रवरो मण्डनमिश्रनामको महान् दार्शनिको जात:। तस्मिन्नेव समये समस्तभारते बौद्धमतस्य प्रचुरतर: प्रचार: प्रचलित आसीत्। येन सनातनधर्मस्य ह्रासदशां प्राप्ता। तस्यैव प्रशमनार्थं भगवत: शङ्करस्य शङ्कराचार्यरूपेणावतारो जात:। स च देशे–देशे भ्रमणं कुर्वाण: बौद्धमतमवखण्डयन स्मार्त्तधर्मपनु: स्थापितवान्। तत्प्रसङ्गेनैव स महानुभावो मिथिलायामायात:। तत्र महामीमांसकम् म.मण्डनमिश्रस्य ‘धामपरपिचयर्थं जलाहरणार्थमागतमकांम–महिलां पृष्टवान्। “स्वत: प्रमाणम्” “अवेहित”मित्यन्तेन श्लोकेन तथा प्रदत्तोतरेण शङ्कराचार्य: मिथिलास्थ संस्कृतमहिमामनुभूय ‘महिष्मतीं’ (महिसी) प्राप्य तेन सह वार्त्तालापं व्यधात्। इति तु विदितमेव सर्वेषां विदुषाम् मिथिलानगरनिवासिनांच।

ततश्च स उग्रतारादेवताप्रसादलब्धसकलयोगतपोविधो मण्डनमिश्र: शङ्कराचार्याणां मत पोषणाप्रानुयस्थित:। एवंच साहाय्यं प्रदामसहैवावस्थित:।

अयमेव सुरेश्वराचार्योऽभुदिति प्रवाद एव। म.म.बालकृष्णमिश्र:– म.म.सरगङ्गानाथझा– म.म.गोपीनाथकविराजप्रभृतयो विद्वांसो नानुमन्यते। सुरेश्वराचार्याणां कृति: पृथगेव। एषाञ्च पृथगेव। तथापि च परस्परभेद एवानुभूयते।

अधुना म.म.महामीमांसकमण्डनमिश्रकृता ग्रन्था: समुपलभ्यन्ते–

1. मीमांसानुक्रमणिका
2. विधिविवेक:।
3. भावनाविवेक:।
4. ब्रह्मसिद्धि:।
5. स्फोटसिद्धि:।

प्रायशः सर्वग्रन्थाः प्रकाशिता एव सन्ति। 'विधिवेकस्य' महती टीका म.म.वाचस्पतिकृता 'न्यायकणिका' नाम्नी कामेश्वरसिंहदरभङ्गासंस्कृत–विश्वविद्यालयस्य 'संस्कृतपुस्तकागारे' वर्तते।

दार्शनिककेन्द्रमिथिलास्थः सर्वोजात् अत एव स मिथिला महीमण्डलमण्डनः मैथिल एवेति सिद्धान्तपक्ष आभाति। विविधविद्याविद्योतितान्तःकरणानां प्रातः स्मरणीयानां मीमांसादिशास्त्रजीवातूनां श्रीमतां तत्र भवतामाचार्यपदमण्डितानां मिथिलामहीमण्डनानां मण्डनमिश्राणां कालनिर्णयं विभिन्नविदुषां वैमत्यमिति नास्ति तिरोहितमशेषशेमुषीजुषां समेधसां विदुषां समाजे। कालिदासाय एव इमेऽपि महानुभावाः स्वजीवनं क्षणभङ्गुरं मन्यमानाः स्वजीवनवृत्तं न प्रकाशयामासुः। इमे महानुभावाः भर्तृहरितः परवर्तिनः शालिकनाथतः पूर्ववर्तिनः कुमारिलशङ्कराचार्यप्रभाकराणां समकालिक आसन'' इति तदीयग्रन्थालोचनेन निर्णीयते। अनुमीयते च सप्तमशताब्द्यां जीवनकालः श्रीमदाचार्यपादानाम्।

प्रयागरजतटे चरमं वयो व्यतिगनयद्भिभट्टोपाधिविभूषयद्भिर्मैथिलवर्य्यैः श्रीमदाचार्यपादं निजाऽवृत्तभावसम्बन्धेन परिचाययद्भिः श्रीकुमारिलमिश्रैः सूचितः श्रीमदाद्यशङ्कराचार्यो मिथिलाजनपदान्तर्गतां साम्प्रतं महिषीनाम्ना प्रसिद्धां महिष्मतीं नगरीमुपेत्य 'स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरोगिरन्ति। शिष्योपशिष्यैरुपगीयमानमवेहि तन्मण्डनमिश्रधामे'ति दासीदेवगिराविस्मयमान आचार्यपादैः शास्त्रर्थं जनरवः मिथिलायां प्रतिनगरं प्रतिग्रामं प्रतिगृहं प्रत्यारामं दिशस्तरङ्गयति।

को न जानीते महिष्मतीं नगरीम्। यस्या महीतलं धेमुड़ानाम्ना ख्याता धर्ममूला नदी स्वप्रबलप्रवाहपरम्पराभिनिरन्तरमार्द्रीकुर्वती शस्यश्यामलं करोति। वितनोति च यदीयं यशोराशिमासमुद्रमुभासनुद्रमुपान्तस्थितं पुरातनं प्रीसूर्यमन्दिरम्। यत्र चाऽऽचार्यवर्यस्येष्टदेवी वशिष्ठेना राधिता श्रीमन्नीलसरस्वत्येकजटाधिष्ठाता श्रीमदुग्रतारा भगवती पूरयति सकलभक्तनम्रजनानां मनोरथान्। अत्रैव वाग्देव्या अंशभूताऽऽचार्यधर्मपत्नी सकलविद्यानिष्णाता स्वनामधन्या श्रीभारती– आचार्यशङ्करयोर्वादजल्पवितण्डासु तत्त्वबुभूत्सारूपवादमाश्रित्य जाते शास्त्रर्थे मध्यस्थतामाललम्बे। यत्र च राजकीयसंस्कृतोच्चविद्यालयीयाः शतशश्छात्रा शतशश्छात्र अहरहः शास्त्राणि चिन्तयन्तः स्मारयन्ति दिदृक्षया समागतातिथीन् श्रीमदाचार्यपादकालम्।

**सन्दर्भग्रन्थसूची-**


1. मण्डन मिश्र और उनका अद्वैत वेदान्त– पण्डित सहदेवझा, प्रकाशकः– मण्डनसन्तति, महिषी, सहरसा बिहार।
2. वेदभूमिमिथिला– संस्कृति दर्शन, श्रीहरिदेवझा, प्रकाशकः– श्रीमहेश झा, ग्रा.पो. अंधराठाढी, मुद्रक– प्रिंटवेल टावर दरभंगा।
3. मिथिला की धरोहर– पं. श्रीसहदेव झा, प्रकाशक– श्री ललन झा, जिला शिक्षापदाधिकारी शेरपुरा, बिहार, मुद्रक– शेखरप्रकाशन, इन्द्रपुरी, पटना–24
4. गूढ़तत्त्वसमीक्षा– स्व.पण्डितरुद्रधरझा, प्रकाशकः– श्रीअमरेन्द्रनाथ झा, 99/1 4क्रास, 2मेन विनाय ले आऊट भूयसन्द्रा, बेंगलुरु–560094